# કૃત્યાપરિહરણસૂક્તં બગલામુખીસૂક્તં ચ

Krityaapariharanasuktam or Bagalamukhisuktam

sanskritdocuments.org

May 6, 2018

# Krityaapariharanasuktam or Bagalamukhisuktam

# કૃત્યાપરિહરણસૂક્તં બગલામુખીસૂક્તં ચ

## Sanskrit Document Information

Text title : kRityApaharaNasUktam bagalAmukhIsUkta

File name : kRityApaharaNabagalAmukhIsUkta.itx

Category : veda, svara, dashamahAvidyA, devii, devI

Location : doc_veda

Proofread by : NA

Latest update : May 6, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 6, 2018

*sanskritdocuments.org*

# કૃત્યાપરિહરણસૂક્તં બગલામુખીસૂક્તં ચ

૩૧ અથર્વવેદાન્તર્ગતં એકત્રિંશં સૂક્તમ્

ઋષિઃ શુક્રઃ ॥ દેવતા કૃત્યાપ્રતિહરણમ્ અથવા કૃત્યાદૂષણ ॥

છન્દઃ ૧-૧૦ અનુષ્ટુપ્, ૧૧ બૃહતીગર્ભાઽનુષ્ટુપ્, ૧૨ પથ્યાબૃહતી ॥

યાં તે ચક્રુરામે પાત્રે યાં ચક્રુર્મિશ્રધાન્યે ।
આમે માંસે કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૧॥

યાં તે ચક્રુઃ કૃકવાકાવજે વા યાં કુરીરિણિ ।
અવ્યાં તે કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૨॥

યાં તે ચક્રુરેકશફે પશૂનામુભયાદતિ ।
ગર્દભે કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૩॥

યાં તે ચક્રુરમૂલાયાં વલગં વા નરાચ્યામ્ ।
ક્ષેત્રે તે કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૪॥

યાં તે ચક્રુર્ગાર્હપત્યે પૂર્વાગ્નાવુત દુશ્ચિતઃ ।
શાલાયાં કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૫॥

યાં તે ચક્રુઃ સભાયાં યાં ચક્રુરધિદેવને ।
અક્ષેષુ કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૬॥

યાં તે ચક્રુઃ સેનાયાં યાં ચક્રુરિષ્વાયુધે ।
દુન્દુભૌ કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૭॥

યાં તે કૃત્યાં કૂપેઽવદધુઃ શ્મશાને વા નિચખ્નુઃ ।
સદ્મનિ કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૮॥

યાં તે ચક્રુઃ પુરુષાસ્થે અગ્નૌ સઙ્કસુકે ચ યામ્ ।
મ્રોકં નિર્દાહં ક્રવ્યાદં પુનઃ પ્રતિ હરામિ તામ્ ॥ ૯॥

અપથેના જભારૈણાં તાં પથેતઃ પ્ર હિણમસિ ।
અધીરો મર્યાધીરેભ્યઃ સં જભારાચિત્ત્યા ॥ ૧૦॥

યશ્ચકાર ન શશાક કર્તું શશ્રે પાદમઙ્ગુરિમ્ ।
ચકાર ભદ્રમસ્મભ્યમભગો ભગવદ્ભ્યઃ ॥ ૧૧॥

કૃત્યાકૃતં વલગિનં મૂલિનં શપથેય્યમ્ ।
ઇન્દ્રસ્તં હન્તુ મહતા વધેનાગ્નિર્વિધ્યત્વસ્તયા ॥ ૧૨॥

ઇતિ દ્વાદશઃ પ્રપાઠકઃ ॥ ઇતિ પઞ્ચમં કાણ્ડમ્ ॥

સ્વરરહિતં કૃત્યાપરિહરણસૂક્તં બગલામુખીસૂક્તમ્

યાં તે ચક્રુરામે પાત્રે યાં ચક્રુર્મિશ્રધાન્યે ।
આમે માંસે કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૧॥

યાં તે ચક્રુઃ કૃકવાકાવજે વા યાં કુરીરિણિ ।
અવ્યાં તે કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૨॥

યાં તે ચક્રુરેકશફે પશૂનામુભયાદતિ ।
ગર્દભે કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૩॥

યાં તે ચક્રુરમૂલાયાં વલગં વા નરાચ્યામ્ ।
ક્ષેત્રે તે કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૪॥

યાં તે ચક્રુર્ગાર્હપત્યે પૂર્વાગ્નાવુત દુશ્ચિતઃ ।
શાલાયાં કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૫॥

યાં તે ચક્રુઃ સભાયાં યાં ચક્રુરધિદેવને ।
અક્ષેષુ કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૬॥

યાં તે ચક્રુઃ સેનાયાં યાં ચક્રુરિષ્વાયુધે ।
દુન્દુભૌ કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૭॥

યાં તે કૃત્યાં કૂપેઽવદધુઃ શ્મશાને વા નિચખ્નુઃ ।
સદ્મનિ કૃત્યાં યાં ચક્રુઃ પુનઃ પ્રતિ હરામિ તામ્ ॥ ૮॥

યાં તે ચક્રુઃ પુરુષાસ્થે અગ્નૌ સઙ્કસુકે ચ યામ્ ।

મ્રોકં નિર્દાહં ક્રવ્યાદં પુનઃ પ્રતિ હરામિ તામ્ ॥ ૯॥

અપથેના જભારૈણાં તાં પથેતઃ પ્ર હિણ્મસિ ।
અધીરો મર્યાધીરેભ્યઃ સં જભારાચિત્ત્યા ॥ ૧૦॥

યશ્ચકાર ન શશાક કર્તું શશ્રે પાદમઙ્ગુરિમ્ ।
ચકાર ભદ્રમસ્મભ્યમભગો ભગવદ્ભ્યઃ ॥ ૧૧॥

કૃત્યાકૃતં વલગિનં મૂલિનં શપથેય્યમ્ ।
ઇન્દ્રસ્તં હન્તુ મહતા વધેનાગ્નિર્વિધ્યત્વસ્તયા ॥ ૧૨॥

ઇતિ દ્વાદશઃ પ્રપાઠકઃ ॥  ઇતિ પઞ્ચમં કાણ્ડમ્ ॥

ઇતિ કૃત્યાપરિહરણસૂક્તં બગલામુખીસૂક્તમ્ ।

NA
Atharvaveda 5.31
Hindi
http://literature.awgp.org/hindibook/vedPuran Darshan/atharvaved/athaveda1b.34
English translation Griffiths
http://www.sacred-texts.com/hin/av/av05031tm

This is also known as kRityaanAshaka shrIbagalA sUktam

*Krityaapariharanasuktam or Bagalamukhisuktam*

pdf was typeset on May 6, 2018

Please send corrections to *sanskrit@cheerful.com*